तत्रैवं सति कर्तारमात्मानं केवलं तु यः ।

पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः ॥ १८.१६ ॥

tatraivaṁ sati kartāramātmānaṁ kevalaṁ tu yaḥ ।
paśyatyakṛtabuddhitvānna sa paśyati durmatiḥ ।। 18.16।।

यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ।

हत्वाऽपि स इमाँल्लोकान्न हन्ति न निबध्यते ॥ १८.१७ ॥

yasya nāhaṅkṛto bhāvo buddhiryasya na lipyate ।
hatvā'pi sa imām̐llokānna hanti na nibadhyate ।। 18.17।।

ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना ।

करणं कर्म कर्तेति त्रिविधः कर्मसंग्रहः ॥ १८.१८ ॥

jñānaṁ jñeyaṁ parijñātā trividhā karmacodanā ।
karaṇaṁ karma karteti trividhaḥ karmasaṅgrahaḥ ।। 18.18।।

ज्ञानं कर्म च कर्ताच त्रिधैव गुणभेदतः ।

प्रोच्यते गुणसङ्ख्याने यथावच्छृणु तान्यपि ॥ १८.१९ ॥

jñānaṁ karma ca kartāca tridhaiva guṇabhedataḥ ।
procyate guṇasaṅkhyāne yathāvacchṛṇu tānyapi ।। 18.19।।

सर्वभूतेषु येनैकं भावमव्ययमीक्शते ।

अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम् ॥ १८.२० ॥

sarvabhūteṣu yenaikaṁ bhāvamavyayamīkśate ।
avibhaktaṁ vibhakteṣu tajjñānaṁ viddhi sāttvikam ।। 18.20।।